This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४२५

पृ० ९८

अथ कर्मविपाकारंभः

Acc. No.:- ~~1207~~ M1357.

Title:- ~~कुपलता~~

Date:- A. D. 1642

Author:- Raghava

Subject:- ~~प्रायश्चित~~

~~पत्र~~ :- (२१).

K K S U LIBRARY
RAMTEK
441 106
M 1357
Dist Nagpur

Checked 2012

(1)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥श्रीदक्षिणामूर्तयेनमः॥स्वानंदायसनंदनादिनुतसत्साक्षारविंदद्वयं॥
नानानंदनिदानमेकरदनंदुष्टार्दनंसद्वयं॥भालेंदुंमदमत्तदंतिवदनंदानेंद्रधानं
सदानंदेवंमदनासिनंदनमहंवंदेसनुंदंमुदा॥१॥मछिंद्रनाथचरणस्मरणप्रवी
णश्रीरुद्रभट्टतनयोविनयोपपन्नः॥सोमाभिधानगणकोगणकोस्तुवैसं
वत्सरादिफलकल्पलतांतनोति॥२॥हिनेस्मिन्नृपशालिवाहनशाकेपूर्णगवा
णेंदुभिःयातेह्यस्तिथिरत्नजानिगदितास्तेनेत्रचंद्रैर्युताः॥योमांगैःपरिवा ६०
जिताःप्रभवतःसंवत्सरोदक्षिणेरेवांतःप्रथितोभवेत्सनवमिर्युक्तस्त्वधोनोत्तरे॥३॥
अथसंवत्सरफलानि॥क्षितिपतिरपनीतिप्रोल्लसद्दंडनीतिर्यदपिजलदपंक्ति
मध्यवृष्टिंकरोति॥तदपिकणसमृद्धिर्हिनिरोगाश्चव्याधेःप्रभवउदितसिद्धिस्त्या
जनःसाधुदृष्टिः॥४॥सकलमनुजतुष्टिर्लोकदोषैकदृष्टिःक्षितिपतिरतिवृष्टि
र्नीतिनीतिप्रदृष्टिः॥बहुधनकणशिरामेदिनीशांतचोराविभवभवचारीरे

नी १

३

धेनवःक्षीरयुक्ताः॥२॥शुक्लादिनवनितानुरागतःस्याज्जनप्रवितताम्मुदंगनः॥कुंकुमर
वनिकरपरस्परंशुक्लनाम्निविदधातिसंगरं॥३॥नृपास्वल्पसंग्रामकर्माभिदाना
जनाःकिंचिदीसामयैःपीड्यमानाः॥तथापिप्रमोदान्विताःसत्कदंभाभवेयुःप्रमो
दाभिदोभीष्टलाभः॥४॥क्लेशिनोयदपिदेहिनोभूलंनसजंतिनिजकर्मनिर्मलं॥वर्ष
णाद्बहुकणाःप्रजापतिख्यातिनाम्निधनसौख्यसंभृतिः॥५॥अन्नदानवशतोज
नानिजान्पीडयंतिबहुशोतिथिव्रजान्॥आंगिरःस्ववनितासुखान्विताःस्वर
तोंगिरसिसंगरेरताः॥६॥स्युर्द्विजाबहुसुखक्रियोत्सुकावारिपूरिततडागवा
पिकाः॥श्रीमुखेधनधान्यसंयुताःश्रीमुखेनरिपुतानरोगिता॥७॥अल्पवृष्टिवध्व
तोल्पसस्यताभूभृतामपिरणक्रियामताः॥भावनाम्नियदपिप्ररोगिणःस्युस्तथा
पिसुखिनःशरीरिणः॥८॥क्षितिःसतृणाधेनवोदुग्धपूर्णासुवर्णास्तिसंतोषि
णाःसर्ववर्णाः॥सुभिक्षंनृपादेवभक्तायुवानौस्त्रियोन्योन्यसक्ताःप्रसक्ताः॥९॥

युवानः

2

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।युद्धकर्मणिरता पृथिवीशाः स्युः परस्परकृताभिनिवेशाः ॥ भूः सुवृष्टिवशा
तः कणपुष्टा धातनाम्नि जनता धनपुष्टा ॥ १० ॥ स्युः सुवर्णकराः पयोधराः
इक्षुशालिरुचिरा वसुंधराः ॥ नैव संगरपराक्षितीश्वराः ईश्वरे सुचिनराः स
दानराः ॥ ११ ॥ फलसस्ययुतं महीतलं सुपयोवर्षि पयोदमंडलं ॥ भवनिपति
मानमांतरे नवनीति बहुधान्यवत्सरे ॥ १२ ॥ ज्वराधिकतरां नुरा अतिदुराप
सस्यांबरादराश्रिनन धरानिरनुरागधरानराः ॥ अवर्णपाकराश्चिराज्जल
धरा सचोराधराः प्रमाथिनि परस्परा हवपराधराधीश्वराः ॥ १३ ॥ अतिस
स्यसमन्विता वनी घनपंक्तिर्बहुनीरदायिनी ॥ जितवैरिगणास्तु पार्थिवाः
सुखिनो विक्रमनाम्नि मानवाः ॥ १४ ॥ सुरुचिरा धनधान्यचयैर्धरा जलध
राजलवर्षणतत्पराः ॥ द्विजवरा सततं विहिताध्वरा रणपरा वृषनाम्नि महीभुजः ॥ १५ ॥

२

अपि शिल्पकलादिभिः समेताः सुखिनः स्युः सकला जनाः सुवृत्ताः ॥ सुविमेघ
गणाकृतां बुवर्षे सति धान्यं बहुचित्रभानुवर्षे ॥ १६ ॥ अतीवाहवे स्यान्मतिर्भूप
तीनां महाव्याधिराधिश्च संघे जनानां ॥ सुभिक्षं क्वचित्क्वापि सौख्यानुभूतिः
सुभानौ क्वचिद्दृष्टिभिंद्रकरोति ॥ १७ ॥ पार्थिवा धनरतारुजाजिता मानवा
गणितविघयायुताः ॥ भूरिधान्यफलसंभृता क्षितिस्तारणे घनअतीं द्रव
र्षति ॥ १८ ॥ घनकणाः सुलभा भुवि नीरदा करकराजिविराजितनीरदाः ॥
परमधर्मविधायिनि पार्थिवे सति जनेषु सुखं बहुपार्थिवे ॥ १९ ॥ रणरतास
रभूभृतां बलैः सहिता भूः सुरगादिसंकुलैः ॥ जनतार्तिरेताव्यये धनधा नरा
न्विता न्यादिसुखांछ्यये ॥ २० ॥ जनताकणतोषिता गदासुरराजेह सति स्वसंपदः ॥
इह सर्वजितास्य वत्सरे मरणं यांति नरपारणाजिरे ॥ २१ ॥

३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकपालनपराअवैरिणः स्युः नृपा जलधराप्रवर्षिणः॥ पुत्रपौत्रधनधा
न्यतोषिणः सर्वधारिणि सदा शरीरिणः॥२२॥ अतिधान्यफलप्रकरा वसुधा
जलदा जलवृष्टिकरा बहुधा॥ मनुजा अनया अगदा ससुताः क्षितिपाश्च
विरोधिभिर्वैररताः॥२३॥ मनुजाः क्षितिपाः सुचिरं प्रकृतिं प्रविलापयंति
परां विकृतिं॥ स्वपदच्युतितः परदेशगताः विकृते धनवस्त्रधनाधिकता॥२४॥
अवनिपतयो विकारयुक्ताः सततं संगरकर्मणि प्रसक्ताः॥ मनुजाः सरुजः
स्युरल्पवृष्टिस्तदपि स्यात्त्वरनाम्नि धान्यपुष्टिः॥२५॥ धरणीकणपुकुभ
वेदलं सजलं वर्षति मेघमंडलं॥ क्षितिपाः सधना धनाढ्यजने निरता लो
कसुखाभिनंदने॥२६॥ अभितोऽपि ससस्यपुष्टिका सजला जनता

वेदसकलविकला॥ क्षितिपा अतीव निरता विजये [illegible]ल्पकमग्रधान्यवि
जये॥२७॥ सदानंतधान्यादिकर्णा धरित्री पयोदावली स्यात्पयोवृष्टि
कर्त्री॥ विवाहोरुयज्ञादिसत्कर्मसिद्धिर्जये कापिकारामकूपादिवृद्धिः॥२८॥
गोधूमशालीक्षुयवैरुपेता सर्वंसहाल्पजलदो किल वृत्रहंता॥ चौरैर्ग
देश्च नितरां परिपीड्यमानः सर्वो जनो भवति मग्नधनाभिहीनाः॥२९॥
देहिनः सुगदिताः स्युरधीराः इति चोरभयार्ता धनचीराः॥ नृनमल्पज
लदा धनमाला दुर्मुखे विरजिताः क्षितिपालाः॥३०॥ रणनृक्षर् भूपाल
बाणाग्नप्राल्पाहताविज्ञानसवून्प्रवाहोरुकल्या॥ धरामध्यसस्पा
र्थिकिलाल्पवृष्टिस्तथापि श्रियाहेलंबेन तुष्टिः॥३१॥ रणकर्मरता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षितिपालगणाश्च बभूल्पनराश्रुविवस्त्रकणाः ॥ जलवृष्टिरतीव जनागदि
तः नदपीह विलंबिनि नसुखिनः ॥३२॥ अल्पं जलं यच्छति देवराजः क्षि
तीश्वराश्चित्तविकारभाजः ॥ प्राक् धान्यमल्पं परधान्यवृद्धिर्विकारिव
र्षेन्नृषुरोगव्याधिः ॥३३॥ नानासंपत्ततोषिता भूमिपालाः सर्वेलोकाः सौ
ख्ययुक्ताः सुशीलाः ॥ देवाधीशो तीवकिल्लालदस्याच्छर्वर्यैद्भूमे दिनी पू
र्णसस्या ॥३४॥ जलवर्षणतो नधान्यनाशः सततं स्यादतितस्करप्रका
रः ॥ भ्रशाभीतिभयं गतातिरेकः सुखहीनः प्लव नाम्नि सर्वलोकः ॥३५॥
धनधान्ययुता धराभवत्पशुवृद्धिमघवांबुदो निशं ॥ समुपातवि
वाहमंगला शुभकृन्नाम्नि जना निराकुलाः ॥३६॥ मित्रभावमुपयां

ति भूभृतः सस्यसंपदधिकांबुवृष्टितः ॥ शोभकृच्छरदि रोगपीडितः स्या
ज्जनः स्वदपि सौख्यसंयुतः ॥३७॥ कामं मता भूमिपालाः समग्रा युद्धे स
क्ता ईतिजाभीतिरुग्णाः ॥ क्रोधिन्यब्दे मध्यवृष्टिः कणानां वृद्धिः स्यात्तां
क्रोधलोभौ जनानां ॥३८॥ स्वल्पं जलं जलदमंडलमादधा[illegible]तिमा
येण धान्यमखिलं विलयं प्रयाति ॥ लक्ष्मीरीश्वरादधिगतापि चला नृपा
णां विश्वावसौ भवति रोगभयं नराणां ॥३९॥ अन्नधान्यमधिकं जलमल्पं
भूभृतां भवति युद्धमनल्पं ॥ स्याज्जनो गतभयः शरद धामा वत्सरो यदि प
राभवनामा ॥४०॥ क्षितौ दुर्लभधान्यपुष्पादि नित्यं क्षितीशाभिधः कु
वधे युद्धकृत्यं ॥ पयोवर्षणं स्वल्पमंसं तरोगः प्रजानां यदा वत्सरः स्या
त्प्लवंगः ॥४१॥ वसुधाल्पधान्यफलमल्पसमेता भ्रशाभीतिरल्पजलदो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बलमेता ॥ नृपतिव्रजो विहित संगरकर्ता यदिवसरो भवति किल धूम्रो ॥४२॥
निसमध्वररता क्षितिदेवा श्रीयुता अरिपदो नरदेवाः ॥ भूः प्रभूतजलतो
बहुधान्या सौम्य नाम्नि जनता भयभग्न्या ॥४३॥ जलवृष्टिकरा पयोध
रा पुष्टिवृद्धि सुखिनो खिला नराः ॥ क्षितिपा निरता नमसरे सति साधा
रणा नाम्नि वत्सरे ॥४४॥ असदाचरणा विगतद्रविणा कृतवैरिगणा न
रपाल गणाः ॥ सलिलं न ददाति पयोदततिर्जनता भयभीतिविरोधि
कृतिः ॥४५॥ गदचौरजना पयुता जनता कुमतां विजिता भवतान्निप
ता ॥ जलदः प्रचुरं न ददाति पयः परिधाविनि धान्यधनापचयः ॥४६॥
जलवर्षणकृन्न देवदेवः कणनाशः कुमतां विरोधिभावः ॥ कथमप
स्यपि जीवति प्रमाथिजनसंघो यदिवत्सर प्रमाथिः ॥४७॥ जल

५

जलदा जलदानतत्पराः क्षितिपाला क्षितिपालनादराः ॥ वसुधा वसुधान्य
संकुला जनतानंदकुन शरन्न धना कुलाः ॥४८॥ राक्षसा इव दयोनिला
जना रोगिणो निरत कार्य साधनाः ॥ राक्षसे विहित धान्य नाशना भूमि
वारि परिवर्षणालघनाः ॥४९॥ क्षितिपाल कुलं रणकर्मकरं धनधान्यकामा
दिकमल्पतरं ॥ अनलादिकभीतिरिला विजला नलनाम्नि जनाः सकला
विकलाः ॥५०॥ क्षितिपा भुजवीर्यजिता रिगणा भयभीति भवाक्षितिरल्पक
णा ॥ दयते जदा अतिनिर्जलता हि पिंगलनाम्नि नमं गलता ॥५१॥ इतयो य
दपि रोगभीतयः सुसाधाधिपधनधान्यसंचयः ॥ लोकलोकपतयो निराध
यः कालयुक्त शरदि युपाचयः ॥५२॥ धान्यं सुभिक्षं मारिव [illegible] धनीनां नरा
णां क्षेमं सदैव फलपुष्पभरो द्रुमाणां ॥ वर्षन्ति मेघाः निकराः प्रसस्यं बुध

6

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रास्तिच्छार्थिनाम्नि धरणीपतयोधियेराः ॥५३॥ धान्यनाशमतीवतस्क
राः स्वल्पवर्षणकराः पयोधराः ॥ राजवंदमखिलं रणोन्मुखं रौद्रनाम्नि
जलनाल्पकं सुखं ॥५४॥ मेदिनीपतिगणोतिदुर्मति सततं निहतशत्रुसंत
तिः ॥ दुर्मतौ तदपि सर्वदेहिनां पुत्रपौत्रधननित्रशोभनः ॥५५॥ भूभृतां
बहुसुखं न विग्रहः स्यात्क्षितौ सकलधान्यसंग्रहः ॥ सर्वदेशविलयो परो
क्षिरा दुंदुभौ सुजलदाः पयोधराः ॥५६॥ धरणीरुहनाकणादिना धरणीना
थगणो रणोन्मनाः ॥ जगतो गदतो गशोषणं रोधिरोद्गारिणि नांबुवर्ष
णं ॥५७॥ सस्यं प्रनस्य पतित्रयं बहुलस्करायां युद्धं परस्परमतीव नरेश्वरा
णां ॥ रक्ताक्षिनाम्नि न जलं प्रबलो निदाघः स्यादीतिरोगविकलो नि
खिलो जनौघः ॥५८॥ आदिमध्यधान्यलयोतिमपोपः स्यात्क्षितिपाल

६

गणोधिकरोषः ॥ मध्यमर्घं बुदराति सुरेश क्रोधननाम्नि धनादिकनाशः ॥५९॥
भूभृतः परमयुद्धकारकाः चौरवन्हिजलदाबलाहकाः ॥ रक्षुतैलमधुधा
न्यनाशनं स्यात्क्षयेतदपि लोकजीवनं ॥६०॥ इतिसोमदेवसकलनराजव
ल्यां प्रभवादिसंवत्सरफलानि समाप्तानि ॥ अथ संवत्सरशरीरफलानि ॥
कृत्तिकाद्वितयं देहं वत्सरस्य प्रकीर्तितं ॥ पूर्वाषाढाद्वयं नाभिः स्नापे हृत्कुसुमं मघा ॥१॥
निपीडिते पापखगेन देहे वानाद्यवातानलभीन्तदेहे ॥ नाभ्यां भयेक्षुजनी
नेन्नवसंफलादि पुष्पे हृदये नधान्या ॥२॥ इसंवत्सरशरीरफलं ॥ अथ धरा
जाविचारः ॥ तत्र गर्गमतं ॥ चैत्रशुक्लादिदिवसे यो वारः सोधिपः स्मृतः ॥ शु
भं वाथ शुभं सर्वं तस्मादेव फलं स्मृतं ॥१॥ उदये प्रतिपच्छेषं मुहूर्तद्वयमस्ति
चेत्र ॥ तस्मिन्नहिनेतु यो वारः स तु संवत्सराधिपः ॥२॥ इदं नर्मदोत्तरदेशे

७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टेः स्वांगीक्रियते ॥ केचित्तु चांद्रमानेन चैत्रशुक्लप्रतिपत्प्रथमक्षणे संव
त्सरप्रवृत्तेस्तत्र यं वासरं वत्सरेशमाहुः ॥ ॥ तत्रायमतो गुर्जरदेशे प्रसिद्धः ॥ ॥
दाक्षिणात्यास्तु कश्यपमतमंगीकृत्य सूर्योदयकालीनप्रतिपद्वासरं वत्सरेश
माहुः ॥ ॥ तथा च कश्यपवचनं ॥ चैत्रशुक्लादिदिवसे सर्किं सुध्वेथवालवे ॥
अर्कोदये तु यो वारः सोब्दपः परिकीर्तितः ॥ १ ॥ अत्राथ वारद्युकेंदिनद्वये
पि सूर्योदये सलिलाम्लो पूर्व एव वारो राजा ॥ चैत्रमेषादिस्वापादौ तुलाक
र्कटकेषु च ॥ नृपोमंत्री धान्यपेषरसस्याधिपक्रमात् ॥ २ ॥ अथो क्रमं त्व्या
दिक्रमो नर्मदोत्तरदेशस्थानां संमतः ॥ तत्र चापएव केचिज्जगन्मोहन
क्रममनुसरंति ॥ उक्तं च जगन्मोहने ॥ चैत्रादिमेषादिकुलीरतौलिमृगा
दिवाराधिपतिः क्रमेण ॥ राजा च मंत्री अथ सस्यनाथो रसाधिपो नीरस

नायकश्च ॥ अर्घादिनाथो घननायकस्स्यात् धान्याधिपश्चापदिनादिवारः ॥ दाक्षिणा
नां तु ज्योतिःफलोदयोक्त एव क्रमोभिमतः ॥ १ ॥ तद्यथा ॥ चैत्रादिमेषकर्कटतुला
स कार्मुकवासराः ॥ नृपोमंत्री धान्यमेघरसस्याधिपःक्रमात् ॥ एवं स्वदेशव्यवस्था
ज्ञेया ॥ अथ राजफलं ॥ धान्यपुष्पफलमूलविनाशश्चौरभीतिरिह मोदकलेशः ॥
भूमिपालकलहोगदकोपः प्राणिनां दिनकरो यदि भूपः ॥ १ ॥ धेनवोतिपयसो
धिकतोषः प्राणिनां जलवशात्कणपोषः ॥ भूमिपो विहितसद्द्विजपूजा नाय
तोहिमकरो यदि राजा ॥ २ ॥ मेदिनीधनकणादिवर्जिता मेदिनीशततिरारहवेर
ता ॥ वह्निचौरगदभीः क्वचिज्जलं मंगले क्षितिपतौ न मंगलं ॥ ३ ॥ धान्यशा
लिसकलं महीतलं श्रीयुतं नृपकुलं निराकुलं गम्भीरि वारिमुग्भवारिसाध
नैः स्याज्जनो यदि नृपोत्र बोधनः ॥ ४ ॥ धेनुवृंदमतिदुग्धसमेतं वर्षणा
त्फलकणादिनितांतं ॥ यज्ञकर्मणि सतामनुरागः पार्थिवे सुरगुरौ न च रोगः ॥ ५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसुमतिजलपूर्णजलाशयाश्च नयुताजनतारहिताभिया ॥ फलकणोपचयोधिव
लचेनवः सुपयसोन्नपतिर्यदि भार्गवः ॥६॥ फलधान्यजलादिकमल्पताजन
तातस्कररोगपीडिता ॥ क्षितिफलगणोरणेगतः क्षितिपालोयदि भानुसुतः ॥७॥
इतिनृपफलानि ॥ अथमंत्रिफलानि ॥ पयोधान्यपुष्पादिकानामभावस्तदाभू
मिपानांमिथोवैरिभावः ॥ जनोरोगचौरादिभीतिर्दधानाक्षुधापीडितश्चे
द्रविः स्यात्प्रधानः ॥१॥ क्षितिदेवततिः फलयज्ञमतिः क्षितिफलरतिफलधा
न्यरतिः ॥ पशवसुखिनोजलदोदुगणः सचिवोयदिकैरिवणीरमणः ॥२॥
धवमवर्षणतः कणनाशनं ज्वलनतस्कररोगनिपीडितं ॥ रणपराक्षिति
पाबुधवंदनेननिरतासचिवक्षितिनंदने ॥३॥ स्यात्कोशवृद्धिर्धरणीश्व
राणां गावःसुदुग्धाः नगदोनराणां ॥ गोधूमशालिक्षुयुताधरित्री पूर्णो
दकाश्चैवछधीजीवमंत्री ॥४॥ पयोधराभ्ररिदिवंक्षितिपाधोधान्यकणा

धौः जीन्मुद्धिचात्रि ॥ पृथ्वीजतांसंपदतीवपृथ्वीमंत्रीयदास्यात्सुरराजमंत्री ॥५॥ ॥
अतिदुग्धयुतोगवांगणः क्षितिपानांनपरस्परंरणः ॥ पशुवृद्धिरतीववृष्टितः
कणपोषसचिवोसदासितः ॥६॥ नैवधान्यफलपुष्पसंचयस्यादवर्षणवशाज्जं
गक्षयः ॥ वह्निभिःप्रचुरतस्करोदयः सूर्यजेत्रसचिवेमहाभयं ॥७॥ इतिमंत्र
फलं ॥ अथअग्रधान्याधिपफलं ॥ खंडांबुवृष्टिर्गदचोरभीतिर्द्विजातीश्वराणांरण
कर्मसक्तिः ॥१॥ धान्याधिकत्वंगोदुग्धंप्रभूतंपुत्रेपौत्रेलोकवृंदंसमेतं ॥
मेघकाभ्रैरिवर्षतिपाथश्चंद्रश्चेस्यादग्रधान्यादिनाथः ॥२॥ जलकणादि
कमल्पमसंशयंज्वलनतस्वरजंप्रचुरंभयं ॥ जगदस्त्वगदवृद्धियुतंस
दाक्षितिसुनोग्रिमधान्यपतिर्यदा ॥३॥ सुखीनोभयवर्जितानवाधनधा
न्यांबुभिरन्विताधरा ॥ नरतिंकुभ्रूतांरणाधिके शशीपुत्रेग्रिमधान्यनाय
के ॥४॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धन धान्यफलादिसंयुता धरणी स्याज्जनतासुखान्विता ॥ यदि वा कुपतिरग
धान्यपः प्रचुरं वारिद दातिदेवपः ॥५॥ विविध धान्यफलोपचयैर्युतः सकल
लोकगणो गदवर्जितः ॥ नृपनयः सहितो बहुसंपदा प्रथम धान्यपतिर्भृगुजो
यदा ॥६॥ धान्याभावः कौरहानिर्नृपाणां मंदावृष्टिः स्यान्मयसंस्कराणां ॥ रो
गावृद्धिश्चातिपिडा जनस्य प्राग्धान्येशश्चेत्सुतो भास्करस्य ॥७॥ इ सग्रधा
न्याधिपफलानि ॥ अथ मेघाधिपफलानि ॥ सदा दुर्दिनं धान्यं पुष्पादिनाशः
रोति क्वचिन्निरवृष्टिं सुरेशा ॥ भवेत् स्करोपद्रवो भूरवकेन दुर्दिने ध्वा घने श्री
सति व्याधिभीतिः ॥१॥ गवां यादसां सस्यपुष्पादिकानां प्रवृद्धिः सुखं चापि
विद्वज्जनानां ॥ नदीकूपवापितडागेषु पाथः प्रपूर्णं यदा चंद्रमा मेघनाथः ॥२॥
अनिलः प्रबलोऽग्निभयं प्रचुरं धनधान्यफलादिकमन्नपतौ ॥ गदकोपव

१

जलराधिपता ववनीतनुजे ॥३॥ सदा सकलता भयुतं
शाज्जगदल्पबलं नृकुलैर्लिपिकाश्यविशारणकराद्धिरलं ॥ जलवृष्टितः सक
लधान्यभीतिः शशिनंदनो यदि पयोदपतिः ॥४॥ सुरपतिकुरुते जलवर्ष
णं विविधसस्यफलादिकपोषणं ॥ द्विजगणा मखकर्मकराः क्षितौ जलध
राधिपतौ यदि वाक्पतौ ॥५॥ द्विजकुलमतिनिध्वं मुदं प्रयाति त्रिदशापति
प्रबलं जलं प्रददाति ॥ अगणितकणसंयुता धरित्री जलदपतिर्यदि पूर्वदे
वमंत्री ॥६॥ चौरव्रजादीतभयं नृपुरोगभावः स्यात्कंदमूलफलपुष्प
कणाद्यभावः ॥ न क्वापि वृष्टिरवनीपतिकोपहानिः क्षितिं क्वचित्खलु यदा
घनराजऐनिः ॥७॥ इति मेघफलानि ॥ अथ रसेशफलं ॥ वापिकादि
षु जलं च नितांतं लोकवृंदमुरुशीतरुजार्तं ॥ इक्षुतैलयववल्लविनाश
यः स्याद्यदा रसपतिः नलिनीशः ॥१॥ प्रचुरमैक्षवतैलयवादिकम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खक रक्षतिदेवकदंबकं ॥ द्विशादिकुधमतीवबाबांततियदिय रसाधिपति

रजनीपतिः ॥२॥ गुडतैलघृताद्यमल्पकं मणिमुक्ताकनकादिनाधिकं ॥

मधुपुष्पजलाशयः सदा रसराजा वसुधा सजोयदा ॥३॥ वापीतडाग

सरिदादिप्रपूर्णमंगः शुंठिकणालशुनाब्धिमकाहिगवनावः ॥ जंबाम्रका

मलकपुष्पमधूकपोपं चंद्रात्मजे यदि रसाधिपतिर्नृतोषः ॥४॥ कुं

कुमादुपचितिब कुंदकं स्यात्तथांबरफलैक्षवादिकं ॥ चंद्रचंदनसुवर्णसं

भृति श्चेद्गुवे द्रसपति ईहस्थितिः ॥५॥ लवणेक्षुतिल मसी जतुचर्मपुकं

श्याघधिकं भवेनातु ॥ उशनारसनायकोयदा बहुकोशयगावादिकं

तदा ॥६॥ दुर्णानीलिलोहकैः जातं समर्घं रोप्यं स्वर्णाद्यं रसाद्यं समर्घं ॥

वर्षयत्यंबारिदं दारके शापीडा संतं स्याद्यदार्कि रसेशः ॥७॥ इतिर

१०

सेशफलं ॥ अथ पश्चाद्धान्याधिपफलं ॥ ज्वरेण सहितो जना नबहु पावना

दिकं क्षितिभृतांमिथो रणविधौ नैवोदकं ॥ कुलित्थचणकादिकोपचिति

रितिभीतिसदाभवेद्दिवसनायकश्चरमधान्यनाथोयदा ॥१॥ नभस्तो

यविलजनाश्च संश्रियः सस्यदुग्धफलमूलसंचयः ॥ वासवः प्रचुनीरदा

यकश्चेद्विधुश्चरमधान्यनायकः ॥२॥ धान्यानामा वोदुर्लभं नंमूलकंदं नी

रं स्वल्पं पुडुकनमपटं द ॥ रोगा द्रुते भीप्रजानां समाजोपश्चाद्धान्ये

स्वामिनि क्ष्मातनुजे ॥३॥ यवश्रीहिगोधूममुद्गेक्षवानां प्रवृद्धिः सुखं स

र्वविद्वज्जनानां ॥ पयो गोमहीष्यादिकानां ससारं बुधे प्रांसधान्याधिपेभ

सिनिरं ॥४॥ भूभृतादि हक दाधिनमन्युर्भृरिवर्षीतिजलं श्वातमन्यः ॥

भूदिदेवनिचयो मिमतेजो स्याद्यदा चरमधान्यप ईज्यः ॥५॥ क्षिति

(११)

सुरामरवकर्मणितमरा बहुलमं बुनितांतकाणाधरा ॥ नरषु सत्फलं पुष्पसमुद्भव
श्वरमधान्यपतिर्यदि भार्गव ॥६॥ निर्द्धनाक्षिती भनोरणादसास स्यमल्पमति
रोगिणो नरा: ॥ नैव वर्षति जलं सुरेश्वर: स्याधदायकणप: शनिश्चर: ॥७॥
इति पश्चिम धान्यफलं ॥ अथाद्रा प्रवेश फलं ॥ तत्रादौ तिथिफलं ॥ रवेराद्रा प्र
वेशश्चेज्जगमो हननं फलं ॥ तच्चुविद्वानसकलं दृष्टरूप येबुवे धुना ॥ तत्र
तिथिफलं ॥ प्रतिपद्दिवसे भानोर्यदाद्रायां प्रवेशनं ॥ न्तणं गृहे गृहे तर्हि भ
वेन्मंगलवर्द्धनं ॥१॥ भानोर्यदि द्वितीयायां भवेदाद्रा प्रवेशनं ॥ तर्हि स्या
सर्वधान्यानां वस्त्रादिनां विवर्द्धनं ॥२॥ भास्करस्य तृतीयायां यस्याद्रायांप्र
वेशनं ॥ इतिभीति भवेत्तर्हि तस्कारादिविवर्द्धनं ॥३॥ गणपतितिथ्यां स्मर
हरधिष्ठे ॥ यदि रविवेशो ध्रुवमशुभं स्यात् ॥४॥ पंचम्यां रोद्र नक्षत्र

११

प्रयाति यदि भानुमान् ॥ सर्वेषां प्राणिनां तर्हि फलं स्यादुत्तमोत्तमं ॥५॥ षष्ठ्यांमा
द्रा प्रवेशश्चेत् जायते पद्मिनीपति: ॥ तर्हि वित्तसंपत्या नराणां प्रचुरं सुखं ॥६॥
भास्करो भास्करतिथौ यदाद्रायां प्रवेशनं ॥ कुरुते तर्हि लोकानां संततं क्षे
ममुत्तमं ॥७॥ यदि स्यादष्टमीतिथ्यां माद्रा नक्षत्रगो रवि: ॥ सस्यानां वासरसा
तर्हि स्वल्पवृष्टिर्न संशय: ॥८॥ सूर्यस्य शिवनक्षत्रे प्रवेशो नवमी यदि ॥
तर्हि स्यात्सस्य आधिति रेवमादुर्मनीषिण: ॥९॥ सूर्यस्य रोद्रसंवेशो यदि स्या
द्दशमीतिथि: ॥ नानाविधानि कार्याणि मंगलानि दिनेदिने ॥१०॥ एकाद
श्यां तिथौ सूर्यो रोद्रं भं याति चेत्तदा ॥ सफलं धनधान्यानि सुभिक्षं जायते
ध्रुवं ॥११॥ द्वादश्यां शिवनक्षत्रं प्रविष्टश्चेद्दिवाकर: ॥ नानाविधं शुभं तर्हि
जनप्राप्नोति निश्चितं ॥१२॥ दिवाकरस्य रोद्रभप्रवेशने त्रयोदशी ॥ तिथिर्य
दि स्याच्चतानदा पतेदनंगलं जलं ॥१३॥ रवेश्च शिवर्क्ष वेशने तिथिर्यदि च

12

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुर्दशी ॥ समस्तधान्यवासस्तोमहर्गता भवेत्तदा ॥१४॥ पौर्णिमास्यां दिने शाश्वे
दान्ननक्षत्रगो रविः ॥ प्रजानां तर्हि विविधा संपूर्णा स्युमनोरथः ॥१५॥ आ
मायां पद्मिनीनाथे रौद्रनक्षत्रगे सति ॥ भूमिपानां विनाशः स्यात्तस्कराणा
मुपद्रवः ॥१६॥ अथ वासरफलं ॥ दिनपतिवारे पशुपतिधिष्ण्ये ॥ दिनपतिवे
सति पशुनाशः ॥१॥ शशिधरवारे स्मरहरधिष्ण्ये ॥ दिनकरवेधो सति
हि सुभिक्षे ॥२॥ भानौ वै वो पृथ्वीसूर्यो वारे रौद्रधिष्ण्ये चेत् स्यात् ॥ शास्त्रा
चाता पृथ्वी शान्तानि निःसंदेहो भवतु तर्हि ॥३॥ बुधस्य वासरे रौद्रधिष्ण्यं भा
नुः प्रयाति चेत् ॥ तर्हि ब्राह्मणजातीनां द्रव्यवृध्यासुखं बहु ॥४॥ देवराज
गुरोर्वारे यदि स्याद्रौद्रगो रविः ॥ तर्हि शान्तिश्च पुष्टिश्च तुष्टिश्च प्रतिदिनं नृणां ॥५॥
शनैश्चरस्य वारे चेत् रविरार्द्रागतो यदि ॥ तदा तर्हि लोकानां नितरां प
दबुद्धिमां ॥७॥ ॥ अथ नक्षत्रफलानि ॥ रवेरार्द्राप्रवेशो चेदासं

१२

भंदिनभं भवेत् ॥ अश्वादिपशुसंघस्य वृद्धिः स्यान्मंगलानि च ॥१॥ अर्कस्य रौ
द्रसंवेशो भरणी चंद्रभं यदि ॥ तर्हि स्याद्रोगबाहुल्यं शुभं मे वक्रदा च ना ॥२॥
कृत्तिका यदि चांद्रर्क्षं भी शाधिष्ण्यागते रवौ ॥ अग्न्यादिकं भयं भूरि तर्हि स्यान्नो
बुवर्षणं ॥३॥ रोहिणी चंद्रनक्षत्रे भानुरार्द्रागतो यदि ॥ तर्हि धान्यविनाशः
स्यात्संततो पौरविल्ल देहिनां ॥४॥ यदि रौद्रप्रतिष्ठो र्कोभ्रगो ंके भ्रगगे सति ॥
धान्यांबरघृतादीनां प्रबलं तर्हि जायते ॥५॥ रौद्रनक्षत्रगे चंद्रे रौद्रभं याति
चेद्रविः ॥ सकलप्राणिनां तर्हि रौद्रकर्म प्रकुर्वते ॥६॥ अर्कस्य रौद्रसंवेशो य
दि चांद्रं पुनर्वसु ॥ अतिवृद्धिः समस्तानां सस्यानां तर्हि निश्चयात् ॥७॥
दिनर्क्षे पुष्यनक्षत्रे रौद्रं व्रजति चेद्रविः ॥ तदा जलयुता भूमिः सर्वधर्मस
मन्विता ॥८॥ सार्पभं दिनभं चेत्स्याद्वर्कस्यार्द्राप्रवेशनं ॥ दारुणं कर्मलो

(13)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कानां भवेत्सौख्य विनाशनं ॥९॥ रोहिं विशाति चेन्मानुपित्र्यभं चंद्रसंयुतं ॥
अल्पवृष्टिस्तदा सेयाकंदमूलादिकल्पता ॥१०॥ भाग्यभे सति चंद्रर्क्षे आयते
रौद्रगो रविः ॥ तदा भूमिविस्तता कीर्ति प्रसरं भोगवर्द्धनं ॥११॥ हस्तनक्षत्रगे चं
द्रे रौद्रनक्षत्रगो रविः ॥ सविता स्यात्तदा सर्वे सस्यसौख्यसमन्वितः ॥१३॥
यदि रौद्रम आदिस चंचभे यमदेवते ॥ तदा सम्रिवृद्धिस्यात् सुत्रपो भयुतो जनः ॥१२॥
सविता यदि रौद्रर्क्षे व्रजे चित्रागते विधौ ॥ तदा चित्राणि धान्यानि सर्वदे
वसुमंभवेत् ॥१४॥ भास्करो रौद्रगो [illegible] स्यात् मारुतं दिनभे सति ॥ धन
धान्यसमृद्धिस्याद्धनवृद्धिर्दिने दिने ॥१५॥ विशाखा यदि चंद्रर्क्षे भानो
रार्द्रप्रवेशनं ॥ तदा निखिलरोगानां विनाशो जायते ध्रुवं ॥१६॥ रा
शां कर्भेभैत्रावर्ते यदि चेद्रविः ॥ सर्वलोकाश्च भूपाश्च संतुष्टास्युः सदाभ
रा ॥१७॥

१३

इंद्रभे चंद्रसंयुक्ते सविता रौद्रगो यदि ॥ नरा सकललोकानां जायते प्रचुरं भयं ॥१८॥
चंद्रको [illegible]ति मेयश्चार्द्राविसंयुते ॥ भयं नानाविधं हसां [illegible] सरोगवृद्धि
ता ॥१९॥ आर्द्रा चेद्रविणा युक्ता तोयजे दिनभे सति ॥ तर्हि सर्वमहीपाल परस्प
रविरोधिनः ॥२०॥ वैश्वभे चंद्रसंयुक्ते रौद्रभं यदि सूर्ययुक् ॥ तदा नरा स्वकर्मा
णि कुर्वंति मंगलानि च ॥२१॥ श्रवणे चंद्रसंयुक्ते रविणा रौद्रभं यदि ॥ सर्हितं
स्यात्तदा लोका पुत्रसौख्यसमन्विताः ॥२२॥ सवितुः शिवनक्षत्रप्रवेशसमयेभ
वेत् ॥ वासवं यदि चांद्रर्क्षं तदा बहुतिलादिकं ॥२३॥ शशीना वारुणे युक्तो रवि
णा शिवदैवते ॥ यदि स्यात्तर्हि [illegible] तर्हि जलपूर्णा वसुंधरा ॥२४॥ सर्वो [illegible]
पदाधिष्ण्ये रजनीपतिसंयुते ॥ पयकी रौद्रभं यातितदा सर्वसुखोदयः ॥२५॥
चांद्रे हि बुध्न्यनक्षत्रे रौद्रे चेदर्क वेशनं ॥ तदा सर्वाणि कार्याणि सिद्धिं यांति न

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णा सदा ॥२६॥ श्रुतिभे नेमिय दि पौष्णे सति यदि रौद्रं ॥ प्रविशति भानुर्नरपतिनि
धनं ॥२७॥ इति नक्षत्रफलानि ॥ अथ योगफलानि ॥ प्रथमजे योगे त्रिनयनधि
श्रो ष्ण्या ॥ यदि रविबिंबं वसु सस्यं ॥१॥ प्रीतियोगे विद्यमाने ससर्को यदि रौद्रगः ॥ स
र्वा वसुमतितर्हि सलिलेन परिप्लुता ॥२॥ अयुष्मत्संज्ञके योगे यदा स्याच्छिव
र्क्ष गः ॥ तर्हि सर्वे महीपालाः स्वस्थचित्ता निरामया ॥३॥ सौभाग्यनामके योगे रौ
द्रगश्चेद्दिवाकरः ॥ सौभाग्यारोग्यतावासितर्हि स्यात्सर्वदेहिनां ॥४॥ सार्द्रशो
भनयोगे चेद्रौद्रगः पद्मिनीपतिः ॥ शोभनं कर्म कुर्वंति तर्हि सर्वे नृणां जनाः ॥५॥
अतिगंडाख्ययोगे चेदार्द्रायाति दिवाकरः ॥ परस्परं महायुद्धं तर्हि कुर्वंति भूमि
पाः ॥६॥ सुकर्मानामयोगे च यदि शैवे रविर्व्रजेत् ॥ तदा सर्वे जनाः सुराः सुक
र्मकर्तुमुद्यताः ॥७॥ सतिधृतियोगे यदि दिवसेशः ॥ प्रविशति रौद्रं भवति

१४

सुभिक्षं ॥८॥ योगे शूलाभिधाने चेद्रौद्रं याति दिवाकरः ॥ शूलादिकैर्महारोगैः पि
डा संततदारुणां ॥९॥ गंडयोगे वर्तमाने रौद्रगो यदि भास्करः ॥ तदा दुष्टानि कर्मा
णि कुर्वंति निखिला जनाः ॥१०॥ तरणे यदि रौद्रर्क्षं प्रवेशो वृद्धि योगकः ॥ पुत्रपौ
त्रादिवृद्धिस्यात्तर्हि यज्ञादिकर्म च ॥११॥ सतिध्रुवाख्ययोगे चेद्रौद्रगः स्या
द्दहर्पतिः ॥ जनाः अनेकशः सर्वेपि नैव चंचलमानसाः ॥१२॥ व्याघातनाम्नि
योगे चेद्रविणार्कं तमीशभं ॥ तदा जनानां सर्वे पां दुर्भिक्षं प्राणनाशनं ॥१३॥
रवेरार्द्राप्रवेशस्य समये यदि हर्षणः ॥ तर्हि धान्यादिसंवृद्ध्या प्राणिनां हर्षसंभवः ॥१४॥
वज्राभिधानयोगे चेत्तपनो रौद्रगो भवेत् ॥ तर्हि स्वल्पकलहो कश्चित्स्यात् जल
वर्षणं ॥१५॥ मार्तंडः सिद्धियोगे चेत्कुर्यादार्द्राप्रवेशनं ॥ धनधान्यांबरादीनां वृ
द्धिस्यात्तर्हि नोदकः ॥१६॥ व्यतिपाताभिधे योगे हेलिरार्द्रां गतो यदि तर्हि राज्ञा

(15)

जनानां चनिश्चयेन स्यात् धनक्षयः ॥१७॥ वर्यो न वर्तमानश्चेद्भवे राज्ञां भये
शान्ते ॥ अल्पवृष्ट्याखिलं धान्यं कंदमूलादि दुर्लभं ॥१८॥ परिघे सति योग
चेद्युमणिशिवमंत्रजेत् ॥ तदा धर्मार्थयोनाशो राजानः परपीडकाः ॥१९॥
शिवयोगे शिवर्क्षे च व्रजेद्दिवसनायकः ॥ सदाचाररताः सर्वे सदामंग
ल्यभोगिनः ॥२०॥ सिद्धयोगे सहस्रांशोः शिवनक्षत्रयायिनि ॥ अदनानां हि
कार्याणां सिद्धिः स्यादिकं बुधः ॥२१॥ अस्तु भानू रौद्रनक्षत्रं साध्ययोगे प्रयाति
चेत् ॥ असाध्यमपि साध्यं स्यात् कार्यं तर्हि विशुभ्रतां ॥२२॥ शुभयोगे दिने
शश्चेत् नक्षत्रं धर्मतो व्रजेत् ॥ तर्हि किं लालवृद्धिः स्यात् सर्वे संतुष्टमानसः ॥२३॥
शुक्लयोगे दिनकरश्चेत् रौद्रागमे सति ॥ जलवर्षणयोगे धान्यानामुपच
यो भवेत् ॥२४॥ ब्रह्माभिधानयोगे च मलनीशशिवर्क्षगः ॥ जलं च

९५

सकलं मध्यमं तर्हि जायते ॥२५॥ ऐंद्राभिधेययोगे चेद्भिरोचनसमन्वितं ॥ श्री
लोचनस्पद्दाति जलवर्षणं ॥२६॥ सतिवैधृतियोगे चेत् रवी शिवधिष्ण्यगः ॥
सर्वेषामपि जंतूनां तदा व्याधिभयं भवेत् ॥२७॥ इति योगफलानि ॥ अथ वेला
फलं ॥ पार्वतीरमणांद्रिवायदा स्याद्दिवाकरसमन्वितं तदा ॥ जायते वसुमतीक
णानिता नस्कारादिकभयं गलाल्यतो ॥१॥ निशायां यदा रौद्रमेर्के प्रवेशस्तदा
तिवृष्टिं विधत्ते सुरेशः ॥ गवां स्यात् सुसंपन्न सस्यप्रभूतं मही पालवृंदं रणे ने
वसत्वं ॥२॥ रौद्रप्रवेशात रणे विधुश्चेत्रिकोणसंस्थो यच्चतुष्टयस्थः ॥ जल
वर्षयोगो वा शुभविवृद्धिनो वा धान्यं प्रभूतं निखिलं तदानीं ॥३॥ इति वेलाफलं ॥
अथ नवविधमेघानयनं ॥ शाके षड्गुणिते नंदै ९ भाजिते शेषतो घनः ॥ अनंत ए
कशेषस्यात् संवर्तश्चा द्विशेषके ॥१॥ त्रिशेषे पुष्करो द्रोणश्चतुःशेषप्रकीर्तितः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालनामा पंचशेषे षट्शेषे निलकः स्मृतः ॥ वरुण सप्तशेषे स्यात् वायुरष्टावशे
षके ॥ नवशेषे तदोनामा क्रमान्मेघा नवस्मृताः ॥३॥ विनाशनं शालियवादि
कानां तथैव कार्पासघृतादिकानां ॥ घनं यदावर्तकनामधेयं स्वल्पंजलं स्या
द्धुनिनामपायः ॥४॥ कालाधिक्यं स्वल्पताधर्मकार्ये पृथ्वीपालास्तत्पराणान्य
कार्ये ॥ संवर्तकाख्यो नीरदः स्याद्धि यत्र प्रायोवायुर्वातिसर्वत्र तत्र ॥५॥ नैवकं
दफुलमूलविवृद्धिः जायते विविधधान्यतकवृद्धिः ॥ रोगतो जनक्लेशतत्वमन
न्यंपुष्करे जलधरे जलमल्पं ॥६॥ महीशाः स्वसंपत्तिवृध्या समेता समस्ता
महिक्ष्मारिधान्ये नयुक्ता ॥ यदा जायते द्रोण नामा पयोदस्तदादेवनाथोऽभ
वेत्सस्ययोदः ॥७॥ रोगतो विकलता वसुधायां स्यान्मिथःकलहता क्षमान्नतां ॥
कालनामजलदो यदा भवेन्नैव वर्षति वृथा जलं तदा ॥८॥ सस्ययोदिश

१६

नितोकुलपूर्णा विरक्तो ॥ खिलमहीपरिपूर्णा ॥ नीलनामजलदे जलवृष्टि
र्जायते सकलमानवतुष्टिः ॥९॥ अग्निहोत्रकरणादराद्विजाः स्युस्तदा
धिकमुदाखिलाः प्रजाः ॥ अर्णवे नसहशं महीतले वारुणे जलधरे भ
हितलं ॥१०॥ नैवांबुवृष्टिं कुरुते सुरेशः समस्त धान्यांबरकादिनाशः ॥
धराधरस्याद्यदिवायुनामा जनव्रजाः स्तौहिविहीनधामाः ॥११॥ रोगा
धिक्यं जायते निरशोषस्त्रौ राधिक्यं नैवधान्यादि पोषः ॥ यस्मिन्व
र्षे स्यात्तदो नाम मेघ तस्मिन्दुःखं प्राणुयाद् दुःखसंघः ॥१२॥ इतिमेघफलं ॥
अथ देशविशेषेण मेघानयनानि फलानि च ॥ शाकोद्भवे गुणितेसैके च
तुर्भक्ते विशेषतः ॥ ऐरावतो महापद्मः कुंजी तोवादनोघनः ॥१॥ भागी
रथीहिमवतोरंतरेयः प्रदेशकः ॥ तत्रांबु वृष्टिकर्तारो मेघा ऐरावतादिकाः ॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्या कन्त्रिगुणितसैको वेदहृच्छेषतो घनः ॥ मंदनामा मंदभद्रो मगमंदो म
हास्विः ॥१॥ जाह्नवी विंध्यनगयो मध्येयस्य प्रदेशकः ॥ मंदादिको जलधरो
तत्र वर्षणकृद्भवेत् ॥२॥ एकयुक्ते शाके वेदैर्भक्ते शेषांकतो घनः ॥ विद्युज्जिह्वो
महोर्म्याख्यश्री प्रगो मंदविक्रमः ॥५॥ दधिप्रायः प्रदेशः स्यात् सदा विंध्या
द्रिमध्यगः ॥ विद्युज्जिह्वादिको मेघो वृष्टिकृत्तत्र जायते ॥६॥ वह्निभिर्भाजि
ते शाके घनशेषांकसम्मितः ॥ सिंधुमेतो महाकायः पर्जन्याख्यप्रकीर्तितः ॥७॥
गोदायामाद्रिमध्यस्थो यः स्याद्भूमिप्रदेशकः ॥ करोति वर्षणं तत्र सिंधु
मनादिको घनः ॥८॥ एकेन सहितः शाको नेत्रहृच्छेषतो घनः ॥ संवर्तना
मा सप्तधनो द्वितीयः पुष्करो निधः ॥९॥ कृष्णातो दक्षिणे भागे यावत्सागरेश्व
रः पुरः ॥ वृष्टिस्तत्र प्रदेशः स्यात् संवर्ताख्यपयोधरः ॥१०॥ इति देश

१८

विशेषेण मेघानयनं तत्फलानि च ॥ अथ द्वादशनागानयनं तत्फलानि च ॥
शाको वाम्यो युतः सूर्यैर्भक्तः शेषांकतो घनिः ॥ सुबुधाख्यो नंदसारीकर्को
टाख्यो पृथुश्रवः ॥१॥ वासुकी तक्षकाख्यः स्यात्कंबलोऽश्वतरस्तथा ॥ हेममा
ली नरेंद्रस्यो वज्रदंष्ट्रो वृजानिधः ॥२॥ सुबुधनामसहितो भुजंगो जाय
ते यदा ॥ नृपाणां सुबुद्धिकर्ता स्यान्मध्यवृष्टिप्रदायकः ॥३॥ यस्मिन्वर्षे नागरा
जो नंदसारिपिधानकः ॥ तस्मिन्वर्षे महावृष्टिं कुरुते नंदते जनः ॥४॥
यदा कर्कोटको नाम जायते पशुनाशनः ॥ तदा नंदं दुदृता वृद्धो मरणे स्यान्म
हीपतेः ॥५॥ पृथुश्रवा भुजंगेंद्रो जायते यत्र वत्सरे ॥ तत्र कीलालपल्पं स्यात्स
स्यहानिर्न संशयः ॥६॥ उदेति यत्र वत्सरे सदा सुकी भुजंगमः ॥ सम्यक्धान्य
दायकः सुरकारकः सदा ॥७॥ तक्षकविद नागेंद्रो जायते यत्र वर्षके मते
त्र मध्यमवृष्टिः स्याद्वि[illegible]हन्त्रयते मृतिः ॥८॥ यदैव कंबलाभिधो भुजं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गा

गमस जायते॥ तदास्तिमध्यमं जलं समस्त धान्यमुत्तमं॥ ९॥ यस्मिन्वर्षे भुजं
गेंद्रो जायते श्वराभिधः॥ नवर्षति जलं वज्री तदा सस्य विनश्यति॥ १०॥ हेम
माली तिनागेंद्रो जायते सस्य योमही॥ समस्त धान्य संपूर्णा प्रभूत जलवृष्टि
तः॥ ११॥ तदे द्रसंज्ञउरगो यत्र वर्षे प्रजायते॥ तदा स्यान्निखिला पृथ्वी प्रभूत
जलपूरिता॥ १२॥ यत्र संवत्सरे नागो वज्रदंष्ट्राभिधानकः॥ तदा बुवर्षणं ने
व सर्व सस्य विनाशनं॥ १३॥ यदा वृषाभिधानस्य भुजग स्योदयो भवेत्॥ त
दा सस्यादिकाल्पत्वं सुतरा मिति तो भयं॥ १४॥ इति द्वादश नागानयनं तत्फलानि
च॥ अथार्द्रादि दश नक्षत्राणां गर्भ लक्षणं गर्भपात लक्षणं च॥ मूलादिषु द
शोन्मितेषु रविभे धत्ते ऽंबु विद्युत्पादपर्श्वे स्यान् नहि [illegible] तोरवि पुजां गर्भो
दशानां भवेत्॥ गर्भो हा च्छेदनं दस्र १९॥ भितादिने वृष्टि सु मेषे रवौ चंद्राद्ये

१८

दश केष्विवतोंबु पतनात्तत्र गर्भपातो ध्रुवं॥ १॥ अथ रोहिणि चक्रं॥ मेषार्के दिन
नक्षत्राद्द्वयो युग्मं तटे द्वयं॥ मिरावर्के द्वयं संधौ सा मिजिद्गणनाभवेत्॥ १॥
यदा पयोनिधिस्थलं गतं विरंचिभं तदा॥ अतीव वर्षणं भवे समस्तधान्यमु
त्तमं॥ २॥ यदि विधिधिष्ण्यं भवति तटस्थं॥ बहु जल वृष्टिर्घन कण वृद्धिः॥ ३॥
रोहिणी नाम नक्षत्रं पर्वतस्थं यदा भवेत्॥ खंडवृष्टिस्तदा ज्ञेया सर्वसस्य
विनाशनं॥ ४॥ संधिसंस्थे यदा ब्राह्मं जायते तदा॥ खंडवृष्टिस्तदा सर्वथा
न्यासमयः॥ ५॥ इति रोहिणी चक्रं॥ अथ धर्षिंशोपकानयनं॥ शाके रामेरा हते स
म ० भक्ते धो यं द्विरभ्रं पंचेप्युक्ता स्वदृष्टिः॥ लब्धांश्याकं कल्पयित्वा मुहूर्त
स्त्रैव सर्वकर्म सम्यक् विधेयं॥ १॥ धान्यं तृणं शीत मुष्णं बायु वृष्टि विनाशनं॥
भ्रांतिमोविग्रहो ज्ञेयो गणितार्णव पारगैः॥ २॥ शाको ब्धि ४ गुणितैः शैलैः ७

79

भक्तः श्लो पंक्ति संगुणं ॥ एकेनसहितं क्षुत् स्यादेवमग्रे मुकुफलात् ॥३॥ तृषा
निशातथालस्यमुद्यमध्यांनिरगतः ॥ क्रोधो दंडस्तथा नेदो मैत्रीस्यान्नदनंतरं ॥४॥
ततः स्याद्रसनिष्पत्तिफलनिष्पत्तिरगतः ॥ उत्साहस्तदनु प्रोक्तः क्रमोयं सर्व
संमतः ॥५॥ शाके सप्त७ गुणे मंदे९ भाजिते स्यात् शेषकं ॥ द्वि२ भाजि३ युक्तश
लभाक मैत्रिविलंबतो गुरुः ॥६॥ अग्रेस्तु करवामुखकाख्यु रीति वृष्टि स्यादगतः ॥
अतिवृष्टिः खचंक्रंच परचक्रंच नानकं ॥७॥ ततोरत्नानि वस्त्राणि घृतं तै
लं दुकूलकं ॥ उर्णावस्त्राणि पुष्पलावल्कलं भूर्जपत्रकं ॥८॥ सुवर्णस्यात्ततः
स्ताम्रं वंगं तदनु रोप्यकं ॥ लोहखर्परसत्वं स्यं पित्तलं चोषकांश्यकं ॥९॥
शाके ष्ट८ गुणिते नंदे९ भाजिते सति शेषकं ॥ द्वि२ भाजि३ युक्तमुग्नं स्यात्सक
ति लभ्यते गतः ॥१०॥ सौम्यस्वभाव संप्रोक्तः स्यात्पापप्रकृतिस्ततः ॥ पुण्य १९

स

स्वभाव तदनु स्याधिग्रेषज्यमगतः ॥११॥ अचारः स्याद नाचोरामरणं खलु जन्मचा
स्याद्देशोपद्रवोन्द्र नंदेशास्यात्ततः परं ॥१२॥ चोराग्निश्चोरशमनंमग्निभिरग्नि
नाशनं ॥ विषमुक्तिर्विषशमनः सेवकसंततः परं ॥१३॥ स्वामित्वं स्यान्निजधनं ततः
परधनं भवेत् ॥ स्तुतं च परश्चलीकर्म आरणं आरणाश्रयः ॥१४॥ मारणं मारणशमं
स्तंभनं स्तंभनाश्रयः ॥ मोहनं मोहनशमं स्यात्तथा उच्चाटनं भवेत् ॥१५॥ उच्चाटनो
पशमनं स्याद्वशीकरणं ततः ॥ वशीकरणनाशः स्याद्वालप्रकृतिस्ततः परं ॥१६॥ स्या
त्पित्तप्रकृतिश्चात् कफप्रकृतिरितः ॥ द्वंद्वज संन्निपातश्च यशश्चापयशो
भवेत् ॥१७॥ गर्वो गतः प्रपंचस्यात्तुबाधा ततः परं ॥ भूतबाधोपशमनंग्रह
दोषाश्च तच्छमः ॥१८॥ पंच५ निसतानि ७गो ९नि शिष्टे ११पथकृताडिते वै शाके
सप्तभक्ते सति ॥ शेषकंस्यात् २ हतं पंच५ युक्तं स्युः क्रमात् दंडजा ज्ञाराज्ञाः श्वेतजो हि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कः॥१९॥ खखाभ्रतर्क भयमेः कलेश्च धोषकं भजेत् ॥ फलं हि पुण्यमिरितं नखच्यु
तुपातकं ॥२०॥ २१६००० इत्यादि पातकां तथा क्रमात्सो ज्ञ विश्लोषकाः ॥ तथोगोन
खहृच्छेषा सर्वनिष्पत्तिरीरितः ॥२१॥ इति निश्लोपका नयनं ॥ अथायमया नयनं ॥
षट्स्रवोद्ध्वारभुवोरजनी ध्रोश्च ५ छौ कुजे ८ नगभुवः शशी पुत्रे १७ गो भुवश्चाक्षीह
श्रो गुरु १९ भृगवोः २५ भास्करस्य तनये चंद्र ग्राहः ॥१॥ त्रिघ्नेवर्षपतिराश्रीप
वत्सरे क्ष्येपंचा ५ न्विते तिथि १५ हृते सति शेषअयः ॥ तथेकुनाशनें हते पवनै ५ स
मे ते तिथिहृते च भितो व्ययस्यात् ॥२॥ वेद ४ रसे ६ भूदिन १५६४ शके कार्तिके सं
तकमासिमसिते ६ ॥ अघमिथो भृगुओनिलधिष्ण्ये फलकल्पलतापरि पूर्ति
मुपेता ॥१॥ ॥ समुद्रे नना दुस्या तटे कुबेरे कुच्या ॥ सं धौ तु वणिजागेहे मा
जापस्तत्र पर्वते ॥ अस्यार्थः ॥ रोहिणीनक्षत्रं समुद्रे पतितं तस्यफलं ॥ रजकार

२०

हेउदकं अस्ति ॥ तटे पतितं तस्य फलं तदेव ॥ संधौ पतितं तस्य फलं ॥ वणिजगृ
हे उदकमस्ति ॥ पर्वते पतितं कुलालगृहे उदकं ॥ ॥ शाके ब्धिचंद्रा शिविधुप्रमा
ते भाद्रे सिते सौर्य युते तिथ्यां ॥ स्वमा शिवन कल्पलतां हि जा सानु वा पन
मा खलु राघवा ख्यः ॥ १ ॥

KKSU LIBRARY RAMTEK 441 106 Dist Nagpur M 1357

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.10.20 15:40
,TRANSFERRED=2020/10/23 at 15:43:11
,PAGES=21
,TYPE=STD
,NAME=S0004501
,Book Name=M-1357-KALPKALA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection